॥ श्री ॥

अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचितः

## ॥ श्री मध्वविजयः ॥

### १. प्रथमः सर्गः

कांताय कल्याणगुणैकधाम्ने नवद्युनाथप्रतिमप्रभाय ।
नारायणायाखिलकारणाय श्रीप्राणनाथाय नमस्करोमि ॥ १.१ ॥
अनाकुलं गोकुलमुल्ललास यत्पालितं नित्यमनाविलात्म ।
तस्मै नमो नीरदनीलभासे कृष्णाय कृष्णारमणप्रियाय ॥ १.२ ॥
अपि त्रिलोक्या बहिरुल्लसंती तमो हरंती मुहुरांतरं च ।
दिश्याद दृशं नो विशदां जयंती मध्वस्य कीर्तिर्दिननाथदीप्तिम ॥ १.३ ॥
तमोनुदाऽऽनंदमवाप लोकः तत्वप्रदीपाकृतिगोगणेन ।
यदास्यशीतांशुभुवा गुरूंस्तान त्रिविक्रमार्यान प्रणमामि वर्यान ॥ १.४ ॥
मुकुंदभक्त्यै गुरुभक्तिजायै सतां प्रसत्त्यै च निरंतरायै ।
गरीयसीं विश्वगुरोर्विशुद्धां वक्ष्यामि वायोरवतारलीलाम ॥ १.५ ॥
तां मंत्रवर्णैरनुवर्णनीयां शर्वेंद्रपूर्वैरपि वक्तुकामे ।
संक्षिप्नुवाक्ये मयि मंदबुद्धौ संतो गुणाढ्याः करुणां क्रियासुः ॥ १.६ ॥
उच्चावचा येन समस्तचेष्टाः किं तत्र चित्रं चरितं निवेद्यं ।
किंतूत्तमश्लोकशिखामणीनां मनोविशुद्ध्यै चरितानुवादः ॥ १.७ ॥
मालाकृतस्तच्चरिताख्यरत्नैः असूक्ष्मदृष्टेः सकुतूहलस्य ।
पूर्वापरीकारमथापरं वा क्षाम्यंतु मे हंत मुहुर्महांतः ॥ १.८ ॥
श्रीवल्लभाज्ञां ससुरेंद्रयाज्ञां संभाव्य संभाव्यतमां त्रिलोक्याम ।
प्राणेश्वरः प्राणिगणप्रणेता गुरुः सतां केसरिणो गृहेऽभूत ॥ १.९ ॥
येये गुणा नाम जगत्प्रसिद्धाः यं तेषु तेषु स्म निदर्शयंति ।
साक्षान्महाभागवतप्रबर्हं श्रीमंतमेनं हनुमंतमाहुः ॥ १.१० ॥
कर्माणि कुर्वन परमाद्भुतानि सभासु दैवीषु सभाजितानि ।
सुग्रीवमित्रं स जगत्पवित्रं रमापतिं रामतनुं ददर्श ॥ १.११ ॥
पादारविंदप्रणतो हरींद्रः तदा महाभक्तिभराभिनुन्नः ।
अग्राहि पद्मोदरसुंदराभ्यां दोर्भ्यां पुराणेन स पूरुषेण ॥ १.१२ ॥
अदार्यसालावलिदारणेन व्यापादितेंद्रप्रभवेन तेन ।
प्राद्योतनिप्रीतिकृता निकामं मधुद्विषा संदिदिशे स वीरः ॥ १.१३ ॥
कर्णांतमानीय गुणग्रहीत्रा रामेण मुक्तो रणकोविदेन ।

स्फुरन्नसौ वैरिभयंकरोऽभूत सत्पक्षपाती प्रदरो यथाऽग्र्यः ॥ १.१४ ॥
गोभिः समानंदितरूपसीतः स्ववह्निनिर्दग्धपलाशिराशिः ।
अहो हनूमन्नववारिदोऽसौ तीर्णांबुधिर्विष्णुपदे ननाम ॥ १.१५ ॥
अपक्षपाती पुरुषस्त्रिलोक्यां अभोगभोक्ता पतगाधिराजम ।
विश्वंभरं बिभ्रदसौ जिगाय त्वरापराक्रांतिषु चित्रमेतत ॥ १.१६ ॥
निबद्ध्य सेतुं रघुवंशकेतुभ्रूभंगसंभ्रांतपयोधिमध्ये ।
मुष्टिप्रहारं दशकाय सीतासंतर्जनाग्र्योत्तरमेषकोऽदात ॥ १.१७ ॥
जाज्वल्यमानोज्ज्वलराघवाग्नौ चक्रे स सुग्रीवसुयायजूके ।
आध्वर्यवं युद्धमखे प्रतिप्रस्थात्रा सुमित्रातनयेन साकम ॥ १.१८ ॥
रामार्चने यो नयतः प्रसूनं द्वाभ्यां कराभ्यामभवत प्रयत्नः ।
ऐकेन दोष्णा नयतो गिरींद्रं संजीवनाद्याश्रयमस्य नाभूत ॥ १.१९ ॥
स दारितारिं परमं पुमांसं समन्वयासीन्नरदेवपुत्र्या ।
वह्निप्रवेशाधिगतात्मशुद्ध्या विराजितं कांचनमालयेव ॥ १.२० ॥
श्यामं स्मितास्यं पृथुदीर्घहस्तं सरोजनेत्रं गजराजयात्रम ।
वपुर्जगन्मंगलमेष दृग्भ्यां चिरादयोध्याधिपतेः सिषेवे ॥ १.२१ ॥
राज्याभिषेकेऽवसितेऽत्र सीता प्रेष्ठाय नस्तां भजतां दिशेति ।
रामस्य वाण्या मणि मंजुमालाव्याजेन दीर्घां करुणां बबंध ॥ १.२२ ॥
हृदोरुसौहार्दभृताऽधिमौलि न्यस्तेन हस्तेन दयार्द्र दृष्ट्या ।
सेवाप्रसन्नोऽमृतकल्पवाचा दिदेश रामः सहभोगमस्मै ॥ १.२३ ॥
प्रेष्ठो न रामस्य बभूव तस्मात न रामराज्येऽसुलभं च किंचित ।
तत्पादसेवारतिरेष नैच्छत तथाऽपि भोगान ननु सा विरक्तिः ॥ १.२४ ॥
नमो नमो नाथ नमोनमस्ते नमो नमो राम नमो नमस्ते ।
पुनःपुनस्ते चरणारविंदं नमामि नाथेति नमन स रेमे ॥ १.२५ ॥
किं वर्णयामः परमं प्रसादं सीतापतेस्तत्र हरिप्रबर्हे ।
मुंचन महीं नित्यनिषेवणार्थं स्वात्मानमेवैष ददौ यदस्मै ॥ १.२६ ॥
स्वानंदहेतौ भजतां जनानां मग्नः सदा रामकथासुधायाम ।
असाविदानीं च निषेवमणो रामं पतिं किंपुरुषे किलाऽस्ते ॥ १.२७ ॥
तस्यैव वायोरवतारमेनं संतो द्वितीयं प्रवदंति भीमम ।
स्पृष्टैव यं प्रीतिमताऽनिलेन नरेंद्रकांता सुषुवेऽत्र कुंती ॥ १.२८ ॥
इंद्रायुधं हींद्रकराभिनुन्नं चिच्छेद पक्षान क्षितिधारिणां प्राक ।
बिभेद भूभृद्वपुरंगसंगात चित्रं स पन्नो जननीकराग्रात ॥ १.२९ ॥

पुरे कुमारानलसान विहारात निरीक्ष्य सर्वानपि मंदलील: ।
कैशोरलीलां हतसिंहसंघां वृत्तां वने प्राक स्मरति स्म सूत्क: ॥ १.३० ॥
भुक्तं च जीर्णं परिपंथिदत्तं विषं विषण्णो विषभृद्गणोऽत: ।
प्रमाणकोटे: स हि हेळयाऽगात नेदं जगज्जीवनदेऽत्र चित्रम ॥ १.३१ ॥
दग्ध्वा पुरं योगबलात स निर्यन धर्मानिव स्वान सहजान दधान: ।
अदारिभावेन जगत्सु पूज्यो योगीव नारायणमाससाद ॥ १.३२ ॥
समर्प्य कृत्यानि कृती कृतानि व्यासाय भूम्ने सुकृतानि यावत ।
करिष्यमाणानि च तस्य पूजां संकल्पयामास स शुद्धबुद्धि: ॥ १.३३ ॥
विष्णो:पदश्रिद बकसन्निरासी क्षिप्तान्यपक्षिप्रकर: सुपक्ष: ।
ससोदरोऽथाऽदित राजहंस: स राजहंसीमिव राजकन्याम ॥ १.३४ ॥
इंदीवरश्रीजयिसुंदराभं स्मेराननेंदुं दयितं मुकुंदम ।
स्वमातुलेयं कमलायताक्षं समभ्यनंदत सुचिराय भीम: ॥ १.३५ ॥
महागदं चंडरणं पृथिव्यां बार्हद्रथं मंक्षु निरस्य वीर: ।
राजानमत्युज्ज्वलराजसूयं चकार गोविंदसुरेंद्रजाभ्याम ॥ १.३६ ॥
दु:शासनेनाऽकुलितान प्रियाया: सूक्ष्मानराळानसितांश्च केशान ।
जिघांसया वैरिजनस्य तीक्ष्ण: स कृष्णसर्पानिव संचिकाय ॥ १.३७ ॥
जाज्वल्यमानस्य वने वनेऽलं दिधक्षत: पार्थिवसार्थमुग्रम ।
सत्त्वानि पुंसां भयदानि नाशं वृकोदराग्नेर्गुरुतेजसाऽऽपु: ॥ १.३८ ॥
भोगाधिकाभोगवतोऽरुणाक्षान इतस्तत: संवलतो धरेंद्रे ।
बहून द्विजिह्वान मणिमत्पुरोगान असौ कटून क्रोधवशान जघान ॥ १.३९ ॥
अथैष वेषांतरभस्मलीन: क्रमेण वायुप्रभव: सुतेजा: ।
रुद्धाखिलाशं मुखरं प्रचंडं भस्मीचकाराखिलकीचकौघम ॥ १.४० ॥
स कृष्णवर्त्मा विजयेन युक्तो मुहुर्महाहेतिधरोऽप्रधृष्य: ।
भीष्मद्विजाद्यैरतिभीषणाभं विपक्षकक्षं क्षपयन विरेजे ॥ १.४१ ॥
तरस्विन: प्रोच्चलितानधीरान निर्दग्धपक्षानतितीक्ष्णकोपान ।
स धार्तराष्ट्रान बहुहेतिलीलो विनाश्य विश्वान परया श्रियाऽभात ॥ १.४२ ॥
कृष्णांघ्रिपंकेरुहभृंगराज: कृष्णामुखांभोरुहहंसराज: ।
प्रजासरोजावलिरश्मिराज: ससोदरोऽराजत वीरराज: ॥ १.४३ ॥
पौत्रे पवित्राह्वयजामिपौत्रे धरां निधायासुरधीषु तापम ।
कीर्तिं त्रिलोक्यां हृदयं मुकुंदे भेजे पदं स्वं सहजै: स भीम: ॥ १.४४ ॥
विष्णो: पदांतं भजताऽनिलेन घोरप्रघातैरिति नाशितास्ते ।

रसोज्झिताश्चंचलवृत्तयोऽलं शोभां न भेजुः सुरवैरिमेघाः ॥ १.४५ ॥
एतत्प्रतीपं किल कर्तुकामाः नष्टौजसः संकटमेवमाप्य ।
मुकुंदवैगुण्यकथां स्वयोग्यां काले कलावाकलयंत तेऽलम ॥ १.४६ ॥
यो भूरिवैरो मणिमान मृतः प्राग वाग्मी बुभूषुः परितोषितेशः ।
स संकराख्योऽंघ्रि तळेषु जज्ञे स्पृधा परेऽप्यासुरिहासुरेंद्राः ॥ १.४७ ॥
सान्नाय्यमव्यक्तहृदाखुभुग वा श्वा वा पुरोडाशमसारकामः ।
मणिस्रजं वा प्लवगोऽव्यवस्थो जग्राह वेदादिकमेष पापः ॥ १.४८ ॥
जनो नमेन्नापरथेति मत्वा शठश्चतुर्थाश्रममेष भेजे ।
पद्माकरं वा कलुषीचिकीर्षुः सुदुर्दमो दुष्टगजो विशुद्धम ॥ १.४९ ॥
अवैदिकं माध्यमिकं निरस्तं निरीक्ष्य तत्पक्षसुपक्षपाती ।
तमेव पक्षं प्रतिपादुकोऽसौ न्यरूरुपन्मार्गमिहानुरूपम ॥ १.५० ॥
असत्पदेऽसन सदसद्विविक्तं मायाख्यया संवृतिमभ्यधत्त ।
ब्रह्माप्यखंडं बत शून्यसिद्ध्यै प्रच्छन्नबौद्धोऽयमतः प्रसिद्धः ॥ १.५१ ॥
यद ब्रह्मसूत्रोत्करभास्करं च प्रकाशयंतं सकलं स्वगोभिः ।
अचूचुरद वेदसमूहवाहं ततो महातस्करमेनमाहुः ॥ १.५२ ॥
स्वसूत्रजातस्य विरुद्धभाषी तद्भाष्यकारोऽहमिति ब्रुवन यः ।
तं तत्क्षणाद यो न दिधक्षति स्म स व्यासरूपो भगवान क्षमाब्धिः ॥ १.५३ ॥
निगमसन्मणिदीपगणोऽभवत तदुरुवाग्गणपंकनिगूढभाः ।
अविदुषामिति संकरताकरः स किल संकर इत्यभिशुश्रवे ॥ १.५४ ॥
विश्वं मिथ्या विभुरगुणवानात्मनां नास्ति भेदो ।
दैत्या इत्थं व्यदधत गिरां दिक्षु भूयः प्रसिद्धिम ॥
आनंदाद्यैर्गुरुगुणगणैः पूरितो वासुदेवो ।
मंदंमंदं मनसि च सतां हंत नूनं तिरोऽभूत ॥ १.५५ ॥
॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत नारायणपंडिताचार्यविरचिते
श्रीमध्वविजये
आनंदांकिते प्रथमः सर्गः ॥